सं. १५७८ वर्षे माह वदि ५ शुक्रे ........................ महासेनराज्ञी ........................ श्रीचंद्रप्रभस्वामिबिंबं कारितं............ ....

१०९८ ( ७१६ )

सं. १५७८ माह वदि ७ दिने रविवासरे श्रीमालीज्ञातीय सं. कोका भार्या कनू पुत्रमूलादिपरिवारयुतेन स्वश्रेयोर्थं श्रीसंभवनाथबिंबं का. प्र. श्री श्री श्रीहर्षविनयसूरिभिः ।। श्री ।। छ ।।

१०९९ ( ११९२ )

सं. १५७८ वर्षे माघ व. ८ रवौ श्रीओएशवंशे मं. देवसी भा. माइ सु. मं. सोभा भा. रती सु. मं. तेजासुश्रावकेण भा. गुराइ-पुत्रदेवदास-गगू-हाडा-कूयरजी-पौत्र सुरचंद-चंदन-सुरदासमुख्यकुटुंबसहितेन स्वश्रेयोर्थं श्रीअंचलगच्छे श्रीभावसागरसूरीश्वराणामुपदेशेन श्रीपार्श्वनाथबिंबं का. प्रति. श्रीसंघेन पत्तनवास्तव्या ।।

११०० ( ४६९ )

संवत् १५७८ वर्षे माह वदि ८ रवौ श्रीपत्तनवास्तव्य प्राग्वाटज्ञातीय सा. देवा भार्या वीरू पुत्र सा. वस्ताकेन भा. वनाई पुत्र सा. नीका भार्या जीबाई द्वितीय भार्या मलू पुत्र सा. धनादिकुटुंबयुतेन निजश्रेयोर्थं श्रीसंभवनाथस्य रत्नमयं बिंबं सपरिकरं का. प्र. श्री-साधुसूरिभिः ।। श्रीहेमविमलसूरीणामुपदेशेन ।। श्री ।।

११०१ ( ११६१ )

सं. १५७८ वर्षे माह व. ८ रवौ महिसाणावास्तव्य लघुशाखामंडन व्य. पासा भा. प्रीमलदे पुत्र नाथाकेन भार्या लखमादे-पु.अचलादिकुटुंबयुतेन श्रीश्रेयांसबिंबं का. प्र. तपागच्छे श्रीहेमविमलसूरिभिः ।। श्री ।।

११०२ ( ११४८ )

सं. १५७८ वर्षे माह वदि ८ रवौ श्रीऊकेशवंशे रेहडगोत्रे मं. गजड भार्या षीमाइ पु. मं. जयताकेन भा. चंद्राउली-पु.-पदमसी-धरमसीभ्रातृपौत्रहंसराज-काला-कमलसी-पास-वीर-वस्तुपाल-नाकरादिपरिवारसहितेन श्रीधर्मनाथबिंबं का. श्रेयसे प्रति. श्रीखरतरगच्छे श्रीजिनसमुद्रसूरिपट्टालंकारश्रीजिनहंससूरिभिः श्रीरस्तु ।।

११०३ ( ४७६ )

संवत् १५७८ वर्षे वै. व. १२ शुक्रे राजाधिराजमहाराजश्रीमहासेनराजा श्रीलक्ष्मणादेवी तत्पुत्रश्रीचंद्रप्रभस्वामिबिंबं कारितं सेवकेन कर्मक्षयार्थं श्रेयसे ।।

११०४ ( १४४४ )

सं. १५७६ वर्षे मागसर सु. १० शुक्रे श्रीमालीज्ञातीय विद्यापुरीय गांधिक सं. होदा भा. लाडिकीपुत्र्या सा. सहसकिरणभार्यया माकूनाम्न्या स्वपुण्यार्थं श्रीशीतलनाथबिंबं का. प्र. श्रीपूर्णिमापक्षे भीमपल्लीय भ. श्रीमुनिचंद्रसूरीणामुपदेशेन पत्तनवास्तव्य ।।

११०५ ( २२५ )

संवत् १५७६ वर्षे पोष सुदि ५ शुक्रे नागरज्ञातीय कूरा भार्या कामलदेवी सुत गुणपालेन भ्रातृ कर्मणयुतेन स्वश्रेयसे आगमिक श्रीजयानंदसूरीणामुपदेशेन श्रीनमिनाथादिपंचतीर्थीपट्टः कारितः प्रतिष्ठितः श्रीसूरिभिः शुभंभवतु ।।

११०६ ( ३ )

संवत् १५७६ वर्षे वैशाख सुदी ५ सोमे पत्तनवास्तव्य डीसावालज्ञातीय श्रे. सिंघा भा. सुहासणी सु. श्रे. वेइआ भा. फदी सु. श्रे. तेजाकेन भा. सोमाई-पुत्रधना-मातृनाना-कोका-वियुतेन स्वश्रेयसे श्रीशांतिनाथबिंबं कारितं श्रीतपागच्छे श्रीसौभाग्यनंदिसूरिभिः प्रतिष्ठितं चेति ।। शुभं ।।

११०७ ( १२०१ )

सं. १५७६ वर्षे वै. सु. ५ सोमे श्रीपत्तनवास्तव्य श्रीमालीज्ञातीय सा. लटकण भा. वारू पु. सीपाकेन भा. कसू-पु.-सारंगादिकुटुंबयुतेन श्रीकुंथुनाथ का. प्र. श्रीतपागच्छे कुतुबपुरीयपक्षे श्रीसोभाग्यनंदि···

## ११०८ ( १५८६ )

सं. १५७६ वर्षे वै. सु. ५ सोमे श्रीमालज्ञातीयवृद्धशाखायां विसा देवसि भार्या हर्षू पुत्र वोसा वीरदत्तभार्यासिपूनाम्न्या श्रेयसे श्रीअजितनाथबिंबं कारितं श्रीमति श्रीवृद्धतपा-पक्षे श्रीभृगुकच्छसंज्ञे भट्टारकश्रीधर्मरत्नसूरींद्र तत्पट्टे श्रीपूज्य भट्टा. विद्यामंडनसूरिभिः प्रति. पत्तनवास्तव्य ।।

## ११०९ ( १३४० )

सं. १५७६ वर्षे वै. सु. ६ सोमे श्रीपत्तनवास्तव्य श्रीमालज्ञातीय श्रे. ठाकरसी भा. खीमाई सु. श्रे. वाघा भा. मनाई सुतया प. सिहा सु.प.कूरपालभार्यया कीवाईनाम्न्या श्री-धर्मनाथबिंबं का. श्रेयसे प्रति. श्रीसूरिभिः ।।

## १११० ( ३६७ )

संवत् १५७६ वर्षे वै. सुद … सोमे श्रीश्रीमालज्ञातीय पीहरपक्षे दो. मेघा भा. इंद्राणी सुता स्वसुरपक्षे दो. सधा भा. रही सु. दो. खीमा भा. रमाई धर्म्मश्रेयसे श्रीधर्म्मनाथबिंबं कारितं प्र. श्रीसिद्धांतीगच्छे भ. श्रीश्रीजयसुंदरसूरिभिः पत्तनम. का. ।।

## ११११ ( १८९ )

स्वस्तिः श्री संवत् १५७६ वर्षे वैशाख वदि १ गुरौ श्रीश्रीवंशे फो. मेघा भार्या माल्हणदे पुत्री देमीसुश्राविकया श्रे. तेजा भार्या धर स्वश्रेयसे विधिपक्षश्रीगुरूणामुपदेशेन श्रीशीतलनाथबिंबं कारितं प्रतिष्ठितं श्रीसंघेन पत्तने ।।

## १११२ ( १७५ )

स्वस्तिश्री संवत् १५७६ वर्षे वैशाख वदि १ गुरौ श्रीश्रीवंशे फो. वाछा भा. वहलादे फो. डूंगर भार्या वारू पुत्र मेघा भा. महलणदेश्राविकया पुत्रभीमा-पौत्रधनराज सहितया स्वश्रेयसे श्रीअंचलगच्छे भावसागरसूरीणामुपदेशेन श्रीसुमतिनाथबिंबं का. प्र. श्रीसंघेन ।।

## १११३ ( १६५९ )

स्वस्तिश्री संवत् १५८० वर्षे चैत्र सुदी १३ गुरु श्री स्तंभतीर्थनगरवास्तव्य श्रीउश-वालज्ञातीय सा. देवा भा. देवलदे पुत्र सा. राजा भा. रवाइ पुत्र सा. हेमा-खीमालाखा भा. गोइ पुत्र जयतपालकेन भ्रातृ-पुत्रसा. जगमाल-जिनपाल-महिपाल-उदयकिरण … -विद्याधर-रतनसिंह-जगसी-पदमसी-पुत्रीलिमो-ब.मरघाइ प्रमुखकुटुंबयुतेन स्वश्रेयसे श्री-तपागच्छनायकश्रीहेमविमलसूरीणामुपदेशेन प्रतिष्ठितम् ।।

१११४ ( १२८३ )

सं. १५८० वर्षे वै. व. १२ शुक्रमासे ओसवालज्ञातीय काकरीयागोत्र सा. सीधरपुत्र गेला भार्या गलमदे पुत्र कीता-साठीदा (?)-मेघराज-करमशी प्रमुख. सपुण्यार्थं कारापि. श्रीमुनिसुव्रतस्वामिबिंबं प्रति. श्रीखरतरगच्छे भ. श्रीजिनहंससूरिभिः ।।

१११५ ( १५२० )

सं. १५८० वर्षे वैशाख ज्येष्ठ सु. १३ श्रीमालीज्ञातीय मं. पोचा भार्या प्रीमलदे सु. भोमा भार्या जीविणी सु. वेणा रूडा श्रीपाल भाणा आत्मकुटुंबश्रेयोर्थं श्रीसंभवनाथबिंबं कारापितं प्रति. श्रीमहुकरखरतरगच्छे भ. श्री चारित्रप्रभसूरिभिः ।।

१११६ ( १२१४ )

सं. १५८० वर्षे वै. व. ४ गुरौ श्रीमालीज्ञातीय व्य. काला भा. सोनी पुत्र धना भा. धनादे द्वि. भा. हासलदे आत्मश्रेयसे श्रीविमलनाथबिंबं का. पिप्पलगच्छे श्रीधर्म्मविमल-सूरिभिः प्रति. माउरावास्तव्य ।।

१११७ ( ४१४ )

संवत् १५८१ वर्षे माघ व. ७ शुक्रे श्रीश्रीमालज्ञातीय वृद्धशाखायां सं. लाला भा. ..................... दे पु. वेणा भा. मल्हादे पु. वंछा कुटुंबयुतेन श्रीनिगमप्रभावक श्रीआणंद-सागरसूरिभिः श्रीशांतिनाथबिंबं का. प्र. ।।

१११८ ( ७८७ )

सं. १५८१ वर्षे माघ व. ६ गुरौ श्रीमालज्ञा. दो. नाथा भार्या सारू पुत्र भीमा भार्या भरमादे पुत्र पद्मा-काह्ना-वना-खेतासहितेन श्रीसुविधिनाथबिंबं कारापितं प्रति. श्रीब्रह्मा-णगच्छे पूज्यश्रीहीरसूरिभिः रामणीग्रामे वास्तव्य शुभं भवतु ।।

१११९ ( ५८७ )

सं. १५८१ वर्षे माघ वदि १० शुक्रे श्रीप्राग्वाटज्ञातीय वृद्धशाखायां श्रीपत्तनवास्तव्य श्रे. आसा भार्या लहकू सुत जागा भा. कस्तुराई सुत कर्मण भ्रातृ रहीयाकेन स्वकुटुंबयुतेन श्रीनिगमप्रभावकश्रीआणंदसागरसूरिभिः श्रीशांतिनाथबिंबं का. प्रति. ।।

११२० ( ११६६ )

स्वतिश्री सं. १५८१ वर्षे श्रीस्तंभतीर्थवास्तव्य ओसवाल ज्ञातीय सा. देवा. भा. देव-लदे पुत्र सा. सना भा. रमाइ पु.सा. हेमा-खीमा-लाखा भा. गोई पुत्र जयतपालकेन भ्रातृपु. सा. जगमाल जिणपाल.........

११२१ ( ७६२ )

सं. १५८१ वर्षे मार्ग्गसिर सुदि २ गुरु श्रीमालज्ञा. दोसी गोइंद सुत गणपति सुत ३ हरतति लखमसीं गोरा हरपतिभार्या रत्नादे सुत वीरपाल भार्या मुक्वाई सुत २ सोना श्रीराजखीमा पूर्वजनिमित्तं श्रीपार्श्वनाथबिंबं कारापितं प्रति. श्रीसिद्धांतीगच्छे भट्टारक-श्री ५ देवसुंदरसूरि शुभं भवतु कल्याणमस्तु पत्तने ।।

११२२ ( ६५० )

सं. १५८२ वर्षे चै. व. १० शुक्रे ..........................................................
श्रीचंद्रप्रभुस्वामि ..........................................................
कर्मक्षयार्थं श्रेयसे ..........................................................

११२३ ( १४६५ )

सं. १५८३ वर्षे कार्तिक सुदि २ बुधे प्राग्वाटज्ञातीय प.रामदासश्रीअंबिकाई कारितं प्रति. ।।

११२४ ( ६५६ )

सं. १५८३ वर्षे ज्येष्ठ सु. ५ रवौ श्रीपत्तनमध्ये युवराजवाटके श्रीप्राग्वाटज्ञातीय वृद्धसाजनीयः पटूआ पूंजा भार्या बाई चंपाई सुत रामदास भा. बाई जोबाई सा. साना-पलू-आधर्म्मश्रेयसे श्रीपार्श्वनाथबिंबं कारापितं प्रति. श्रीसिद्धांतीगच्छे भ. जयसुंदरसूरिभिः ।। श्री ।।

११२५ ( १२८४ )

सं. १५८३ वर्षे ज्येष्ठ सु. १३ सोमे श्रीसुमतिनाथबिंबं प्रति. ।।

११२६ ( ७६६ )

सं. १५८३ वर्षे ज्येष्ठ सु. १३ दिने उकेशवंशे कूकडा चोपडा गोत्रे मं. गणोया सुत मं. सांगण भार्या अरघाई सुत विजयसंघेन श्रीविमलनाथबिंबं का. प्र. श्रीखरतरगच्छे श्री-जिनमाणिक्यसूरिभिः स्वपुण्यार्थं कारितं ।।

११२७ ( ६६२ )

सं. १५८४ वर्षे माघ वदि ७ श्रीपार्श्वनाथबिंबं कारितं प्रतिष्ठितं ।।

११२८ ( ४७३ )

संवत् १५८५ वर्षे फागुण सु. ७ सोमे श्रीपत्तनवास्तव्य प्राग्वाटज्ञातीय वृध्धशाखायां मं. सारिंग सुत महं लक्ष्मीदास भार्या मंगाई पुत्र महं नरशंघ-दामाभ्यां श्रीशांतिनाथबिंबं कारितं प्र. गुरु श्रीसत्यकृपायां प्राणिन (?) प्रतिष्ठितं शुभं भूयात् श्रीशुभम् ।।

११२९ ( ६५१ )

सं. १५८६ वर्षे ......... ष सुदि १२ सोमे ......... ......... .........
श्रीअचिरादेवी ......... श्रीशांतिनाथबिंबं ......... .........
सेवक ......... ......... ......... .........
कर्मक्षयोर्थं श्रेयसे ......... .........

११३० ( ४६१ )

संवत् १५८६ वर्षे ...... सु. ८ रवौ उपकेशगच्छे व्य. कर्मसी भा. .........
......... श्रीसुमतिनाथबिंबं कारितं श्रीचतुर्दशीपक्षे सिद्धांतीय श्रीसोमचंद्रसूरिभिः प्रतिष्ठितं शुभं भवतु ।।

११३१ ( ७४५ )

सं. १५८७ वर्षे पोस वदि ६ रवौ गणिरत्नहर्षबिंबं कारितं ......... .........

११३२ ( २६५ )

संवत् १५८७ वर्षे वैशाख सुदि ७ सोमे अद्येह श्रीपत्तनमध्ये युवराजवाटके श्रीश्रीमालज्ञातीय दो. हरपति भा. रत्नाइ सु. दो. श्रीवीरपाल भा. मृगाइ सु. २ सोनपाल श्रीराज कुटुंबश्रेयोर्थं श्रीसंभवनाथबिंबं कारितं श्रीसिद्धांतीगच्छे भट्टा. श्रीदेवसुंदरसूरि तत्पट्टे श्रीजयसुंदरसूरिभिः प्रतिष्ठितं ।।

११३३ ( ६६८ )

संवत् १५८७ वर्षे वै. व. ६ रवौ सा. धरणा भार्या श्रा. मनोपूजनार्थं श्रीविमलनाथबिंबं कारितं ।।

११३४ ( ६० )

संवत् १५८७ वर्षे वैशाख वदि ७ सोमे श्रीश्रीमालज्ञातीय भा. रूपा भा. इंद सुत वस्ता भा. हरखीनाम्न्या स्ववित्तेन स्वश्रेयसे श्रीश्रेयांसनाथबिंबं कारितं प्र. धर्मगुरुवृध्धतपापक्षे भ. श्रीजिनमाणिक्यसूरीणां तत्पट्टे भ. श्रीजयमणि ... ।।

११३५ ( १५१३ )

सं. १५८७ वर्षे वैशाख वदि ७ सोमे अद्येह श्रीपत्तनमध्ये श्रीमालीज्ञातीय बोरडीयाड-वाटके दो. रहीआ भा. चंपाई सु. दोसी देवा भा. हिर्याई सुत दोसी रायमल्ल दोसी श्रीदेवा द्वितीय भा. लाऊ स्वधर्मश्रेयसे श्रीशीतलनाथबिंबं कारापितं श्रीसिद्धांतीयगच्छे भट्टा.श्रीजयसुंदरसूरिभिः प्रति. शुभं चिरायुः ॥

११३६ ( १२६५ )

सं. १५८७ वर्षे वै. व. ७ वार सोमे श्रीआदिनाथबिंबं प्रति. श्रेयोर्थं ॥

११३७ ( ११२२ )

सं. १५८७ वर्षे वै. व. ७ सोमे श्रीमालज्ञा. सं. धरणा भा. वारू सुत सिंघाकेन भा. कपूरीइ भ्रातृ सं. वाघा सुत मेला हमीर सहितेन स्वश्रेयोर्थं श्रीकुंथुनाथबिंबं का. प्र. वृध्ध-तपापक्षे भट्टा.श्रीजिनमाणिक्यसूरीणां पट्टे भ. श्रीजयमाणिक्यसूरिभिः पत्तनवास्तव्य ॥

११३८ ( १०६० )

सं. १५८७ वर्षे वै. व. ७ सोमे श्रीमालीज्ञातीय दो. श्रीवीरपाल भार्या मृगाई स्व-धर्म्मार्थं श्रीवासुपूज्यबिंबं का. सिद्धांतीगच्छे श्रीजयसुंदरसूरिभिः प्रति. श्रीयुवराजवाटके ॥

११३९ ( ५७४ )

सं. १५८७ वर्षे वै. व. ७ सोमे डीसावालज्ञातीयः से. सूरा भार्या पुहुती पु. से. वछा भार्या वीरू पुत्र सता-वना से. सता भा. राजू पुत्र वर्धमान से. वना स्वपुण्यार्थं श्रीशांति-नाथबिंबं कारापितं श्रीउपकेशगच्छे कुकुदाचार्यसंताने भट्टारकश्रीश्री५सिद्धसूरिभिः प्रति. श्रीमद्अणहिल्लपुरपत्तने श्रीरस्तु ॥

११४० ( ७२० )

सं. १५८७ वर्षे वै. वदी ७ सोमे श्रीमालीज्ञातीय दो. देवा भार्या हरखाइ सुत दोसी रायमल भार्या इंद्राणी धर्म्मश्रेयसे श्रीसुविधिनाथबिंबं का. प्र. सिद्धांतीगच्छेशश्रीजयसुंदर-सूरिभिः श्रीपत्तनमध्ये ॥

११४१ ( ४५२ )

संवत् १५८८ वर्षे फागुण सुद ८ बुधे श्रीश्रीमालज्ञातीय श्रे. अरजण भार्या होरी सुत महिराज मेघा ठूसा. महिराज भार्या. आसी सुत श्रीवंत सीधर लींबा आत्म-कुटुंबयुतेन श्रीसुमतिनाथबिंबं कारापितं श्रीआगमगच्छे श्रीआणंदरत्नसूरीणामुपदेशेन श्रीज्ञानरत्न-सूरिभिः प्रतिष्ठितं ॥

११४२ ( ५६२ )

सं. १५८८ वर्षे फा. सु. ६ गुरौ श्रीश्रीमालज्ञातीय मंत्रि गोपाल भार्या मनी सुत महिसू भाभण मं. महिरा भा. माणिकि पुत्र भीमु भार्या लीली सुत योधु जगडु जगमाल मं. भीमाकेन मातृ-पितृश्रेयोर्थं चतुर्विंशतिपट्टे श्रीवासुपूज्यबिंबं कारा. श्रीपूर्णिमापक्षे वट-पद्रीय श्रीलब्धिसुंदरसूरि......

११४३ ( १३०८ )

सं. १५८८ वर्षे फा. सु. ६ गुरौ श्रीमालज्ञातीय महिरा भा. माणिकी सु. भीमु भा. लीली सु. जोधु-जगडु-जगमाल-भीमाकेन मातृ-पितृश्रेयोर्थं पद्मप्रभबिंबं कारापितं श्रीपूर्णिमा-पक्षे वटपद्रीय श्रीलब्धिसुंदरसूरि तत्पट्टे श्रीजयरत्नसूरिभिः प्रतिष्ठितं काहरवास्तव्य ।।

११४४ ( १५२८ )

सं. १५८८ वर्षे ज्येष्ठ वदि ४ बुधे श्रीमूल संघे भ. श्रीज्ञानभूषणसू. भ.श्रीविजयकीर्ति-सू. भ. श्रीशुभचंद्रगुरुपदेशात् हूंबडज्ञातीय म. सूरा. भा. चांपू सु. जीवा भा. दानी भ्रातृ जोधा भा. अच्छलादे भ्रातृ जागा-काहा प्रणमति ।।

११४५ ( ६४ )

संवत् १५८८ वर्षे ज्येष्ठ वदि ४ बुधे श्रीमूलसंघे भ. श्रीशुभचंद्रा व्य. हीरा माजू सु. रंगा. भा. रंगादे..............

११४६ ( १८ )

संवत् १५८८ वर्षे आषाढ सुदि ८ सोमे ऊसवालज्ञातीय सा. खीमा पु. सा. हासा भार्या बाईहरखीकारापितं भ्रा. सा. समरा सा. लाला श्रीआदिनाथबिंबं कारितं प्रतिष्ठितं श्रीआणंदविमलसूरिभिः कूणगिरवास्तव्यः ।।

११४७ ( ११७४ )

सं. १५८९ वर्षे सं. जिणससमुतला (?) का. प्र. ........................

११४८ ( १५९६ )

सं. १५९० वर्षे वै. व. ११ शुक्रे प्रीमलदे(?) गोत्रे उप सं. (?) ज्ञाती अचलदे पऊ (?) सं. भोला सु. सं. चेला सं. अरजन भार्या ·· सं. भोलाभार्या........... वाजा ..........
तत्पुत्र सं. सारंग सं. जीवत भार्या जसमादे पुत्र कमलस्य सं. विमलसामिनाथ श्रीकोरंट-गच्छे.................श्रीकक्कसूरिभिः श्रीसंभवनाथबिंबं कारितं ।।

११४९ ( १०६५ )

सं. १५६१ वर्षे पोस वदि ११ गुरौ श्रीपत्तने प्राग्वाटलघुशाखायां श्रे. शीधर भा. सोनाई पु. श्रे. गवा पुत्र्या सपूनाम्न्या भा. वीरादेनाम्न्या स्वपुण्यार्थं श्रीअंचलगच्छे श्रीगुणनिधानसूरीणामुपदेशेन पार्श्वनाथबिंब का. प्र. श्रीसंघेन ।।

११५० ( ३७७ )

संवत् १५६१ वर्षे पोसवदि ११ गुरौ श्रीपत्तने प्राग्वाट लघुशाखायां श्रे. सालिग भा. हीरू पुत्र श्रे. देवदास भा. पन्नी सु. श्रे. कमलाकेन भ्रातृविभा-भ्रातृव्यधनराजयुतेन स्वश्रेयोर्थं श्रीअंचलगच्छे श्रीगुणनिधानसूरीणामुपदेशेन श्रीआदिनाथबिंबं कारितं प्रतिष्ठितं श्रीसंघेन श्रीरस्तु ।।

११५१ ( १६५५ )

सं. १५६७ वर्षे ज्येष्ठ सु. १० सोमे श्रीमालज्ञातीय पाटरीवास्तव्य श्रे. रामा. भा. रामदेवि तयोः सु. श्रे. महणसिहेन श्रीसुविधिनाथादिपंचतीर्थी कारिता आगमगच्छे श्रीहेमहंससूरीणामुपदेशेन प्रति. ।।

११५२ ( ५१० )

सं. १५६८ वर्षे पोष व. १ सोमे श्रीश्रीमालीज्ञा. तंबोलीग्रा व्य. माका भा. सोही पुत्र व्य. काहावानगा (?) व्य. हीराकेन भा. रत्नाई पु. वर्धमान हीरजो आषा प्रभृतिसमस्तकुटुंबयुतेन श्रीपार्श्वनाथबिंबं का. चित्रावालगच्छे श्रीपासदेवसूरिभिः ।। पाडलाग्रामवास्तव्य ।।

११५३ ( ७६४ )

सं. १५६८ वर्षे वै. सु. ६ शुक्रे पत्तनवास्तव्य दोसावालज्ञातीय श्रे. माला भार्या जीबाई सुत राजपालनाम्ना भा.जीवी-सुतमेघा-भार्याभीमोपरिवारयुतेन स्वश्रेयोर्थं श्रीसुमतिनाथबिंबं कारापितं प्रति. तपा. श्रीसोमविमलसूरिभिः श्रीरस्तु ।।

११५४ ( १५३० )

सं. १५६८ वर्षे वै. सु. १० गोर आदत् श्रीपारसनाथ पा. समराभाईयापोत श्री पथन (?) ..........

११५५ ( १२६३ )

सं. १५६८ वर्षे वै. सु. १२ दिने श्रीपत्तनमध्ये श्रीश्रीमालीज्ञातीय श्रेष्ठि ठाकुरसी सुत वाघा भुजबल भार्या भरमादे सुत हीरजी नाकर घूसा बिंबंश्रीशीतलनाथ कारापितं प्रति. श्रीसूरिभिः श्रे. सिंघा ।।

११५६ ( ११०६ )

सं. १५-६ वर्षे पोस वदि ५ रविवार बाहदरपुर वास्तव्य ओसवंश कटारिआगोत्र सा. साइआ धर्मपुत्र पं. सहजू भा. पुनाइयुतेन स्वश्रेयोर्थं श्रीकुंथुनाथबिंबं का. प्र. तपागच्छेशश्रीसोमसुंदरसूरिशिष्यश्रीरत्नशेखरसूरिभिः ॥

११५७ ( ८६२ )

सं. १५-६ वर्षे आषाढ सु. ६ नागरज्ञातीय श्रे. परबत भा. पूंजी सुत ढोला-गोला-रामसी ढोलाभार्या वाउ सु. लीणा (?) भूधर-भोजा-सहिजा-वईजा-सारंग सहितेन आत्मश्रे. श्रीशीतजनाथबिंबं का. प्र. श्री वृ. भ. श्रीजिनरत्नसूरिभिः ॥

११५८ ( १२३८ )

सं. १५ शत वर्षे वै. सु. ५ गुरौ श्रीमालज्ञातीय मं. सोमसीह भा. सोमलदे पितृ-मातृश्रेयोर्थं सुत बडआकेन श्रीविमलनाथबिंबंमुख्यपंचतीर्थी कारिता वृद्धथिराद्रगच्छे श्रीपूर्णभद्रसूरिभिः प्रति. श्रीसर्वसूरिभिः ॥

११५९ ( १५८० )

[श्रीगौतमस्वामीजी धातुना] सं. १५८-

११६० ( १४७२ )

सं. १५२- वर्षे श्रीउकेशवंशे प्रल्लशाखायां मं. पद्मा पु. सा. नोडा भार्या नामलदे पु. सा. मल्ह भा. कर्माई श्राविकया पुत्र सा. सोधर सा. सुरपति सा. सुभकर सा. सहसमल्ल तेपु(?)सा. सीधर पु. सा. उदयकर्ण सा. आसकर्ण सा. रायमल्ल सा. सहसमल्ल पुत्र सा. शुभचंद प्रमुखपरिवारसहितया स्वश्रेयसे श्रीशांतिनाथबिंबं का. प्र. श्रीखरतरगच्छे श्रीजिनभद्रसूरिपट्टे श्रीजिनचंद्रसूरिभिः सा. सीधर सा. धरणा शुभं भूयात्

११६१ ( ५१८ )

सं. १५····· प्रा. ज्ञा. ········ सहितेन पितृ-मातृ श्री ············ नाथबिंबं का. प्र. वृ. श्रीविद्याणंदसूरि······

११६२ ( १४३६ )

सं. १६०० वर्षे वैशाख वदि १० शुक्रे श्रीमालज्ञातीय दोसी कुभा भा. टहिकू सु. दोसो धना भा. अमरादे सु. शदा लक्ष्मीदास मं. कर्मदास दोसो लक्ष्मीदास भा. जोबाइ स्वआत्मकुटुंबश्रेयोर्थं श्रीसंभवनाथादिचतुर्विंशतिपट्टः कारापितः श्रीपूर्णिमापक्षे प्रधानशाखायां श्रीकमलप्रभसूरीपट्टे श्रीपुण्यप्रभसूरिभिः प्रति. विधिना पत्तनवास्तव्य

### ११६३ ( १६२ )

संवत् १६०० वर्षे अंचलगच्छे श्रीसा. जस. सा. वछाश्रेयसे श्रीपार्श्वनाथबिंबं का. प्र. ।।

### ११६४ ( १४१८ )

सं. १६०१ वर्षे वैशाख सु. ५ रवौ श्रीपार्श्वनाथबिंबं का. प्र. सेवक............

### ११६५ ( १४६८ )

सं. १६०३ वर्षे वैशाख सु. ५ रवौ [पिता] राजाधिराजमहाराजश्रीअश्विसेन माता श्रीअचिरादेवी तत्पुत्र श्रीशांतिनाथ स्यबिंबं कारितं सेवक रतना कूकर्मक्षयार्थं श्रेयसे.......... विधिना प्रति. शुभं भवतु ।।

### ११६६ ( ६६५ )

सं. १६०३ वर्षे वै. सु. ५ रवौ [पिता] राजाधिराजमहाराजश्रीनाभिनरेश्वर माता श्रीमरुदेवी तत्पुत्र श्री श्री श्री श्री श्री श्री श्रीआदिनाथस्य बिंबं का. सेवकजिणदासेन कर्मक्षयार्थं श्रेयसे सुविधिना प्रतिष्ठितं ।। शुभं भवतु ।।

### ११६७ ( ६७३ )

सं. १६०४ वर्षे वै. व. ७ सोमे सं. वेणा भार्या विमला सु. सं. गांगाकेन श्रीशीतलनाथबिंबं का. प्र. ।। श्री ।।

### ११६८ ( १४५६ )

सं. १६०४ वर्षे श्रीमालीज्ञातीय सं. हरखा भा. हेमाई सु. वर्धा से. वणायग से. वसा से. –छणा (?) अंबाई गोत्रज ..............

### ११६९ ( ११२५ )

सं. १६०५ वर्षे माघ व. ११ गुरौ कुमरगिरिवास्तव्य लघुशाखायां प्राग. धणसा देवा भा. पना सु. ताणा कारापित श्रीआदिनाथ श्रीनागेन्द्रगच्छे प्रति. ।।

### ११७० ( १०५४ )

संवत् १६०५ वर्षे माघ व. ११ गुरौ श्रीमालीज्ञातीय सं. शवा भार्या वादू सुत सं. नाथा श्रीआदिनाथबिंबं कारापितं श्रीसर्वसूरिभिः पत्तनवास्तव्य ।।

११७१ ( ७६३ )

संवत् १६०५ वर्षे माह वदि ११ गुरौ पत्तने श्रीमालीज्ञातीय सं. रत्ना भार्या सोभागिणि सुत सं. मूलाकेन भार्या रतनादे सुत तेजपाल–परिवारयुतेन श्रीसुमतिनाथबिंबं का. प्र. श्रीहर्षविनयसूरिभिः ॥

११७२ ( १५० )

संवत् १६०५ माह वदि ११ गुरौ श्रीपत्तनवास्तव्य श्रीप्राग्वाटज्ञातीय संघवी हरखा भार्या बाइ सोही सुत संघवी जेठा भार्या बाइ इंद्राणी सुत संघवी थावर श्रीवासुपूज्यबिंबं कारापितं प्रतिष्ठितं श्रीसूरिभिः ॥

११७३ ( ४६० )

सं. १६०८ वर्षे वै. सु. १३ शुक्रे प्राग्वाटज्ञातीय गांधी खीमशी भा. अमरी सुत गांधी नारद भार्या नामलदे सुत गांधी कमा भा. रमादे सु. पोष प्रमुखसहितेन श्रीमुनिसुव्रतस्वामिपंचतीर्थी कारापिता विजयदानसूरि प्रति. देकावाडाग्रामे ॥

११७४ ( १५५० )

सं. १६०८ वर्षे वैशाख सुदि १३ श्रीपत्तने श्रीमालीज्ञातीय सं. जगमाल भार्या नाकू सुत गीदा धनजी श्रीधर्मनाथबिंबं कारापितं प्रति. श्रीसूरिभिः ॥

११७५ ( १२८१ )

सं. १६१० फा. सु. २ श्रीमालीज्ञातीय श्रे. ठाकुरशी सुत विदाधर सुत भुजबलबिंबं श्रीशीतलनाथ कारापितं प्रति. श्रीसूरिभिः ॥

११७६ ( २३९ )

संवत् १६१० वर्षे फागुण वदि २ दिने श्रीपत्तनवास्तव्य श्रीलघूउसवालज्ञाती सिठि जिनदास भार्या वीराइ सुत राइचंद भार्या पाची सिठि टीकर भा. साबू सुत कीका श्रीश्रीशीतलनाथबिंबं कारापितं तपागच्छाधिपति भट्टारकश्रीपं.विजयदानसूरिप्रतिष्ठितं ॥ कल्याणमस्तु ॥

११७७ ( ६५६ )

सं. १६१० वर्षे फागुण वदि २ सोमे श्रीश्रीमालज्ञातीय दो. थावर भा. झटी सुत दोसी वदाकेन भगिनीवरनू-भा.रंगी-पुत्रवीरपाल-दो.पंचायणादियुतेन आत्मश्रेयोर्थं श्रीशांतिनाथबिंबं कारापितं श्रीधर्मसागरसूरिभिः ॥

११७८ ( ४६६ )

सं. १६१० वर्षे फागुण वदि २ सोमे श्रा. सोनाई पु. सिवराज युतेन श्रीसोनाइसुत प्रतियार्थं (?) श्रीसुमतिनार्थबिंबं कारितं ।।

११७९ ( २४९ )

संवत् १६१० वर्षे `` सु. २ श्रीपत्तन उ. वि. गोगा भार्या मरघी पुत्र पदमसी भार्या अणूआदे पुत्र भोदू श्रीशीतलनाथ तपाश्रीसोमविमलसूरिभिः ।।

११८० ( ८४९ )

सं. १६११ वर्षे वै. सु. २ दिने पाटण से. गंगादास सुत पांचा वदाधर(?) श्रीपार्श्व-नार्थबिबं श्रीवजि(विजय)दानसूरिभिः ।।

११८१ ( ५३५ )

सं. १६१२ वर्षे वै. सु. ६ बुधे श्रीपत्तनवास्तव्य श्रीश्रीमालज्ञातीय श्रे. पाना भा. मरघी सु. श्रे. हापाकेन भा.लाली-सुता-पूराईप्रमुखकुटुंबयुतेन श्रीअजितनार्थबिबंचतुर्विंशति-पट्टः श्रीआगमगच्छे श्रीसंयमरत्नसूरीणामुपदेशेन स्वश्रेयसे का. प्र. पुत्र पौत्रा······

११८२ ( ११८ )

संवत् १६१२ वर्षे ज्येष्ठ शुदि ९ श्रीनमिनार्थबिबं कारितं श्रीहर्षविजयसूरि···

११८३ ( १५५६ )

सं. १६१२ वर्षे ज्येष्ठ श्रीधर्मनाथ श्रीहर्षविनयसूरि जीवा ··········

११८४ ( १३४७ )

सं. १६१३ वर्षे वै. सु. १० गुरौ राजाधिराजश्रीअश्वसेन माता श्रीवामादेवि तत्पुत्र श्रीपार्श्वनाथस्यबिंबं कारित श्रीपाटणवास्तव्य श्रीमालज्ञातीय सा. गलूनी भुजाई बाई टबकाईकर्मक्षयार्थं ।।

११८५ ( १२२० )

सं. १६१३ वर्षे वै. व. १० गुरौ श्रीपत्तनवास्तव्य श्रीमालज्ञा. दो. सोमदत्त भा. कमू सु. सुश्रावक दो. भदाकेन भा. लोलु-सु.सदयवत्स-अमरदत्त-मेघा प्रमुखकुटुंबयुतेन श्रीशी-तलनाथादिजिनपंचतीर्थी श्रीसुविहितपूर्णिमापक्षीय श्रीसूरीणामुपदेशेन कारिता प्रतिष्टिता पूज्यमाना चिरंनंदतु ।। श्रीरस्तु ।।

११८६ ( ५६८ )

सं. १६१४ फागुण सुदि ४ श्रीग्रजितनाथबिंबं का. प्रतिष्ठितं श्रीसूरिभिः ।।

११८७ ( १२८६ )

सं. १६१५ वर्षे पोस सु. ६ दिने श्रीपत्तनमध्ये श्रीमालीज्ञातीय श्रे. ठाकुरसी भार्या खीमाई सु. विद्याधर सु. भुजबलेन कारापितं बिंबं श्रीशीतलनाथ कारापितं प्रति. श्री-सूरिभिः ।।

११८८ ( ४८२ )

सं. १६१५ वर्षे पोस वदि ६से दिने श्रीवडलीग्रामे श्रीप्राग्वाटज्ञातीय द्धा(धा)मी पांचा भार्या खीमाई जीवादे सुत धामी ग्रदा ग्राणंद भत्रीजा धामी वस्ता माता बाइ मकाइ श्रीसंभवनाथबिंबं कारापितं प्रति. श्रीसूरिभिः ।।

११८९ ( २३८ )

संवत् १६१५ वर्षे माह वदि ६ दिने शुक्रवारे श्रीपत्तनमध्ये ग्रोसवालगोत्रे सा. छराज (?) भा. श्रीकमलादे पुत्र सा. कमा भार्या कउडोमदे पुत्र सा. सूर्यमल्लादिपरिवारयुतेन श्रीशांतिनाथबिंबं कारितं स्वपुण्यार्थं प्रतिष्ठितं श्रीबृहत्खरतरगच्छे श्रीजिनचंद्रसूरिभिः ।।

११९० ( १४७८ )

संवत् १६१६ वर्षे चैत्र वदि १० भोमे श्री ........ भार्या .............चंद्रसु भोरा......................

११९१ ( ३४१ )

संवत् १६१६ वर्षे शाके १४८२ प्रवर्त्तमाने चैत्रमासे कृष्णपक्षे रवौ श्रीश्रीमालज्ञातीय परीष्य धरणा भा.......................................यदक(?)बिंबं कारापितं ।।

११९२ ( १६१८ )

संवत् १६१६ वर्षे साके १४८२ प्रवर्तमाने ढंढेरवाडे ढंढेरकुटुंबे श्रीमालज्ञातीय दोषी ऊका भा. ग्राठसुरीइ (?) पुत्र पुना भा. ग्रजाहो सहिज श्रीकशुराइ वासइक यास (?)पुन्यार्थं श्रीधर्मनाथबिंबं कारितं प्रतिष्ठितम् श्रीपूर्णिमापक्षे श्रीविद्याप्रभसूरीजल पूज्य-मानविरजटऊ (?)

११९३ ( ११०१ )

श्रीपार्श्वनाथजी सं. १६१६ वर्षे ..............

११६४ ( १४४१ )

सं. १६१७ मार्गसिर सुदि ८ दिने श्रीगौतमस्वामि-श्रीजिनदत्तसूरि-श्रीजिनकुशलसूरि-श्रीजिनसमुद्रसूरिपादुका का. सा. महमाकेन प्रति. श्रीजिनमाणिक्यसूरिपट्टे श्रीजिनचंद्र-सूरिभिः ॥

११६५ ( १६२ )

संवत् १६१७ वर्षे फाल्गुन सुदि पंचमीदिने बृहस्पतिवारे शुभवेलायां कटारीयागोत्रे सा. हरखा भार्या रत्नादे पुत्र रतू सा. जूवा भार्या जवणादे पुत्र वीरजी प्रमुखपरिवारयुतेन श्रीचंद्रप्रभबिंबं कारितं श्रीखरतरगच्छे प्रतिष्ठितं युगप्रधानश्रीजिनचंद्रसूरिभिः कल्याणमस्तु ॥ श्री श्री ॥

११६६ ( ८७६ )

सं. १६१७ वर्षे ज्येष्ट सु. ५ सोमे श्रीपत्तनमध्ये श्रीमालीज्ञातीय संघवी सिंधा भार्या बाइ हरखी पुत्र सं. सोमा श्रीआदिनाथबिंबं कारापितं श्रीतपागच्छे श्रीविजयदानसूरिभिः प्रति. ॥

११६७ ( ५५४ )

सं. १६१७ वर्षे ज्येष्ठ सु. ५ सोमे श्रीशांतिनाथबिंबं तपागच्छे श्रीनायकविजयदान-सूरिभ्यां प्रति. दोसावाल श्रीज्ञाती. से. देवा भार्या बाइ सखी पु. श्रु. विष्णा-कीका.-ईसर. कारापितं ॥

११६८ ( २४३ )

संवत् १६१७ वर्षे ज्येष्ठ सुदि ५ श्रीपत्तनमध्ये लघुओसवालज्ञातीय विसा पासू भा. सषमाइ पुत्र विमूखू (?) सुत सहिसकरण वीरजीबिंबं श्रीसुमतिनाथ कारापित प्रतिष्ठितं श्रीतपागच्छे श्रीविजयदानसूरिभिः ॥ कला(ल्या)णं सु(शु)भं भवतु ॥

११६९ ( १ )

संवत् १६१७ वर्षे जेठ सुदी ५ सोमे लघुशाषा प्राग्वाटज्ञाती मं. नरसिंघदास भार्या. काबाई सुता बाईजइवंती स्वपुन्यार्थे श्रीपार्श्वनाथबिंबं का. प्र. तपापक्षे भ. श्रीविजयदान-सूरिभिः पत्तननगरमध्ये ॥

१२०० ( ४१ )

सं. १६१७ वर्षे ज्येष्ठ सुदि ५ सोमे प्राग्वाटज्ञातीय सा. मेघा भार्या........ ........स्येन भार्या पूराई पुत्र लालू भ्रातृ हेमासंयुतेन श्रीमुनिसुव्रतस्वामिबिंबं कारितं प्रतिष्ठितं च तपागच्छे भट्टारकश्रीविजयदानसूरिभिः ॥

१२०१ ( १३२ )

संवत् १६१७ वर्षे जेठ सुदि ५ दिने श्रीपत्तनमध्ये प्राग्वाटज्ञातीय सेठि. हीरा सुत राजपाल भार्या हडी सुत डूंगर श्रीबिंबं श्रीसुमतिनाथस्वामि कारापितं प्रतिष्ठितं श्रीतपागच्छे श्रीविजयदानसूरिभिः ॥

१२०२ ( २४१ )

सं· १६१७ वर्षे ज्येष्ठ सुदि ५ दिने श्रीपत्तने लघुओसवालज्ञातीय विसा पासु भार्या सुषनाइ विमु (?) श्रीसुवधिनाथ प्र. श्रीविजयदानसूरि ........

१२०३ ( ४८५ )

सं. १६१७ वर्षे ज्येष्ठ सु. ५ दिने श्रीपत्तनवास्तव्य श्रीउसवालवंश्यज्ञातीय दोसी गोपा भार्या हसु सुत दोसी वछी भार्या टबकाई श्रीपार्श्वनाथबिंबं कारापितं तपागच्छाधिपति-भट्टारकश्रीश्री५विजयदानसूरिप्रतिष्ठितं शुभमस्तु ॥ श्रीः ॥

१२०४ ( ६७८ )

सं. १६१७ वर्षे जेठ सुदि ५ श्रीपत्तने श्रे. दामा भार्या बाइ कस्तूरीइ पुत्र जइवंत सु. श्रीवंत तपागच्छे श्रीविजयदान..........

१२०५ ( ८४० )

सं. १६१७ वर्षे ज्येष्ठ सु. ५ श्रीमालीज्ञातीय संघवी सिधा भार्या बाइ हर्षी पुत्र नरपाल भ्रातृ सोमा बिंबं श्रीआदिनाथ कारापितं तपागच्छे श्रीविजयदानसूरिप्रतिष्ठितं ॥

१२०६ ( १३३१ )

सं. १६१७ वर्षे ज्येष्ठ सु. ५ प्राग्वाटज्ञाती वृधशाखायां वु. हीरा सुत तिलकदास भा. बाई मंगाई सु. हंसराज भ्रातृ वीरजो-केसव श्रीअजितनाथबिंबं कारापितं पूर्णिमापक्षे विद्याचंद्रसूरि तपागच्छे विजयदानसूरि प्रतिष्ठितं ॥

१२०७ ( १४५८ )

सं. १६१७ वर्षे प्रथम .................. श्रीवासुपूज्यबिंबं का. प्र. .......... .......

१२०८ ( १२०८ )

सं. १६१७ वर्षे श्रीपार्श्वनाथ प. .... ................

१२०९ ( ८७१ )

सं. १६१७ वर्षे श्रीश्रेयांसनाथ सं. सोमा भा..............

१२१० ( ८७० )

सं. १६१७ वर्षे श्रीनमिनाथबिंबं फीनाई ...

१२११ ( ८३६ )

सं. १६१७ वर्षे श्रीआदिनाथबिंबं हासी ......

१२१२ ( ८०६ )

सं. १६१७ वर्षे श्रीवासुपूज्यबिंबं अंद्राणा ... ....

१२१३ ( १५५० )

सं. १६१८ वर्षे माघ सु. १३ रवौ श्रीपत्तनवास्तव्य श्रीओस. वं. ज्ञातीय सं. पं.[चा]इण भार्या बाइ हसू. पु. तस पृथयराज भा. बाइ अछबादे सुत प. देवजी श्रीपद्मप्रभस्वामिबिंबं का. श्रीसूरिभिः प्रति. । छ ॥

१२१४ ( ६०३ )

सं. १६१८ वर्षे श्रीविमलनाथबिंबं कारितं प्रतिष्ठतं ..........

१२१५ ( १२६ )

संवत् १६२४ वर्षे मा. सु. ६ सोमे वृद्धज्ञातीय श्रीमाली प. कमल सं. सु. ................. श्रीसुविधिनाथबिंबं प्रति. श्रीहीरविजयसूरिभिः ॥

१२१६ ( १४४० )

सं. १६२४ वर्षे माह सु. ६ रवौ श्रीमालीज्ञातीय से. मूला फता भा. मलाई श्रेयोर्थं पुण्यार्थं श्रेयांसनाथबिंबं कारापितं प्रति. श्रीपूर्णिमापक्षे ..........

१२१७ ( ३६ )

संवत् १६२४ वर्षे माहा सुदि ६ पाटणनगरवास्तव्य दीसावालज्ञातीय सा. हीबा पुत्र सा. चागा भार्या माकू पुत्र सा. हासा भार्या करमाही पुत्र कूअरजीआख्येन श्रेयोर्थं श्रीशांतिनाथबिंबं कारापितं प्रतिष्ठितं तपागच्छनभोमणिश्रीहीरविजयसूरिभिः । शुभं भवतु ॥

१२१८ ( १७२७ )

संवत् १६२४ माघ शुक्ल ६ दिने श्रीनमिनाथबिंबं कारापितं प्राग्वाटज्ञातीय सा. गागा भा. मालो सुत सा. सोहना श्राविका कोकाइनाम्न्या प्रतिष्ठित श्रीतपोगच्छनायकश्रीहीरविजयसूरिभि श्रीसंघोपकारजते (?) सुभं भूयात् श्रीसंघायति .......

१२१९ ( ७०२ )

सं. १६२४ वर्षे माह सुद ....　　　　सोमे गुर्जरदेशे अणहिलपत्तने अक ....　　　　....... ताय (?) सा. गोरा भार्या रुपाइ सुत सा. अभाकेन भार्या खीमाइयुतेन श्रीआदिनाथबिंबं का. प्र. च श्रीमत्तपागच्छे राजाधिराजश्रीआणंदविमलसूरीश्वरपट्टालंकारविजयदानसूरि-पट्टोदयाचलभास्कर-सुविहित-चक्रचूडामणिश्रीहीरविजयसूरिभिः चिरंनंदतात् ।।

१२२० ( ७७३ )

सं. १६२४ वर्षे माह व. १० प्राग्वाट वृहत् साह सोमा भार्या बाई सोभागिणि पुत्र साह पुचा सुत सा. पदमसी श्रीविमलनाथबिंबं का. तपागच्छे श्रीहीरविजयसूरिभिः प्रति. शुभं भवतु ।।

१२२१ ( ८१६ )

सं. १६२४ वर्षे फा. सु. ३ रवौ वासरे लघुशाखायां प्राग्वाटज्ञातीय विसावाण (?) पुत्र (त्री) बाइपुरीई तपागच्छेशश्रीमद्हीरविजयसूरिभिः श्रीसंभवनाथबिंबं कारापितं श्रीरस्तु ।।

१२२२ ( ६२४ )

सं. १६२४ वर्षे फा. सु. ३ रवौ वृद्धशाशायां श्रीमालीज्ञातीय सं. पुंजा भा. शीबाइ सुत सं. टोकरेण श्रीसुमतिनाथबिंबं प्रतिष्ठापितं तपागच्छेशहीरविजयसूरिभिः प्रति. स्व-श्रेयोर्थं ।।

१२२३ ( १४८५ )

संवत् १६२४ वर्षे फागुण सु. ३ रवौ श्रीमालीज्ञातीय श्रेष्ठि गोधा बाइ हीराई पुत्र श्रे. रतनाभार्या षादकीबाई पुत्र श्रे. रायमल भा. बा. मंगाई श्रे. रायमलकेन पितृ-श्रेयोर्थं श्रीश्रेयांसनाथबिंबं का. तपागच्छे श्रीहीरविजयसूरिभिः प्रति. पत्तनवास्तव्य ।।

१२२४ ( ४१६ )

संवत् १६२४ वर्षे फागुण सुदि ८ शनौ पत्तननगरवास्तव्य दो. टोकरशी सुत दो. लखमशी प्रमुखकुटुंबयुतेन श्रेयसे श्रीसीमंधरजिनबिंबं कारितं प्रतिष्ठितं श्रीमत्तपागच्छा-धिराजसूरीश्वरश्रीहीरविजयसूरिभिः शुभंभवतु ।।

१२२५ ( १६१३ )

संवत् १६२४ विसा अटो (?) पूर्णिमापक्षे फाग......

१२२६ ( १४०६ )

सं. १६२४ वर्षे ...... श्रीकरमसी ....................

१२२७ ( १३६३ )

सं. १६२४ वर्षे .................. करमसी ....................

१२२८ ( ८३७ )

सं. १६२४ वर्षे श्रीनर ................................................................................
श्रीकुंथुनाथबिंबं का. प्र. ॥

१२२९ ( ४२६ )

संवत् १६२४ सोमे श्रीआदिनाथ ....................

१२३० ( १६१० )

सं. १६२५ वर्षे श्रीपत्तनमध्ये भ. श्रीजीवा भार्या माणिकदे पु. भ. ...... ...... तनुज पुण्यार्थं बिंबं श्रीचंद्रप्रभस्य विजयपूज्यभट्टारकविजयसेनसूरि स्वहस्ते .................. सकलजनसमस्तसहिते प्रतिष्ठिता कृता पूजनो क भइ शुभ फलदायक भइ...

१२३१ ( ११७५ )

सं. १६२५ वर्षे श्रीपत्तनमध्ये भ. श्रीजोवा भा. माणिक पुत्र नरतमजीपुण्यार्थं बिंबं श्री महावीरनाथस्य विजन पूजार्थं भट्टारकविजयसेनसूरीश्वरैः शुभं .................. समस्तसहिते प्रतिष्ठा कृता ....................................

१२३२ ( १०१० )

सं. १६२५ वर्षे श्रीपत्तननगरे श्रीओसवालज्ञातोय वृध्धशाखायां भ. जोवा भार्या माणिकदे पुत्र भणसाली श्रीरतनजोकेन पुण्यार्थं श्रीअजितनाथस्य बिंबं कारापितं विजय-पुण्यार्थं भट्टारकश्रीविजयसेनसूरिणा स्वहस्ते माघ सुदि ५ शुभमुहूर्ते प्रति. ॥

१२३३ ( ३९१ )

संवत् १६२५ श्रीकाष्ठासंघेनश्रीविजयकोति भ. विद्याभूषण प्रणमति ।

१२३४ ( १४ )

संवत् १६२६ वर्षे फा. सु. ८ दिने तपागच्छ भट्टारकश्रीहोरविजि(विजय)सूरि स्वहस्तप्रतिष्ठितं श्रीधर्मनाथबिंबं सं. वासण भा. नाकू सुत चांपा होपा वडलीग्रामे ॥

१२३५ ( ८७२ )

सं. १६२६ वर्षे वै. ब. २ भृगौ श्रीपत्तनवास्तव्य सा. हेमचंद रूपचंद भार्या बाई दीपु सुत सा. दीपचंदेन श्रीसिद्धचक्रं कारापितं भ. श्रीविजयधर्म्मसूरिभिः प्रति. श्रीतपागच्छे श्रीसिद्धा...

१२३६ ( १५३१ )

सं. १६२७ वर्षे फागुण सु. १२ दने श्रीपार्श्वनाथस्य बिंबं कर्म्मक्षयार्थं सा. हेमामाराइ (?) संघेन कारापितं वटशाखा श्रीओसवाल ज्ञातीय...

१२३७ ( ३२७ )

संवत् १६२७ वर्षे वैशाख सुदि ३ शुक्रे ऊकेशवंशे रांकागोत्रे सा. पूना भा. लाडकी पुत्र सा. सेफा भा. देउ सा. भीम भार्या भरमादे पुन्यार्थं श्रीअनंतनाथबिंबं कारितं प्रतिष्ठितं श्रीबृहत्खरतरगच्छे श्रीजिनकीर्त्तिसूरिपट्टे श्रीजिनसिंहसूरिभिः ।। पत्तनवास्तव्य ।।

१२३८ ( ११९ )

संवत् १६२७ वर्षे वै. ८ बाइ धिगाइ बिंबं कारापितं पार्श्वनाथ प्रति.

१२३९ ( १६०६ )

संवत् १६२७ वर्षे ज्येष्ठ सुदि ५ दिने मंगलवारे सा. गोरा भा. गोरादे श्रेयोर्थं गुरुपादुकानि कारितानि प्रतिष्ठिता श्रीजिनचंद्रसूरिजी खरतरगच्छे ।।

१२४० ( ५९६ )

सं. १६२८ वर्षे फागण सु. १ का. सौभाग सू...........

१२४१ ( १२२७ )

सं. १६२८ वर्षे फा. सु. ७ बुधे ठ. खीमा सुत हीरजीकेन श्रीशांतिनाथबिंबं का. प्र. श्रीहीरविजयसूरिभिः ।।

१२४२ ( १२१८ )

सं. १६२८ वर्षे फा. सु. ७ बुधे कुमरगिरिवास्तव्य प्राग्वाटज्ञातीय वृद्धशाखायां अंबाई गोत्रे व्य. खीमा भा. कनकादे पुत्र व्य. पेदाकेन भा. पुंजीप्रभृतिपरिवारयुतेन स्वश्रेयोर्थं श्रीविमलनाथबिंबं का. प्र. श्रीबृहत्तपागच्छे श्रीविजयदानसूरिपट्टे श्रीपूज्यश्रीहीरविजयसूरिभिः ।। श्रीरस्तु ।। आचंद्रार्कं नंद्यात् श्री ।।

१२४३ ( ६१० )

सं. १६२८ वर्षे वै. सु. ११ बुधे राज भा. कारापितं श्रीतपागच्छे श्रीहीरविजयसूरि भ. प्रति. श्रीआणंदविमलसूरि विजयदानसूरि श्रीविद्यासागर उपा. श्रीभोविजय……

१२४४ ( ६२१ )

सं. १६२८ वर्षे वै. सु. ११ बुधे श्रीपत्तनवास्तव्य श्रीमालज्ञातीय पु. वरधा भार्या रूपी सुत पु. लींबाकेन भार्या अजाइ सुत कुंअरजीप्रमुखकुटुंबयुतेन स्वश्रेयोर्थं श्रीशांतिनाथबिंबं का.प्र. तपागच्छे प्रभुश्रीहीरविजयसूरिराज्ये महोपाध्यायश्रीकल्याणविजयगणिभिः श्रीरस्तु ।।

१२४५ ( ८२६ )

सं. १६२८ वर्षे वै. सु. ११ दिने पाटणवास्तव्य बाइ चंदू श्रीनमिनाथबिंबं का. प्र. तपागच्छे भट्टारक हीरविजयसूरिशिष्यमहोपाध्यायश्रीकल्याणविजयगणिभिः ।।

१२४६ ( ४३७ )

संवत् १६२८ वर्षे वैशाख सुदि ११ दिने पत्तनवास्तव्य प्राग्वाटज्ञातीय श्रेष्ठी जोवा भा. चमाई सुत कोका भार्या जीबाई समस्तकुटुंबयुतेन पुण्यार्थं श्रीनमिनाथबिंबं का. प्र. श्रीतपागच्छाधिराजभट्टारकचक्रवर्तिश्रीहीरविजयसूरिशिष्य-कल्याणविजयगणिभिः ।।

१२४७ ( ५०५ )

संवत् १६३० वर्षे पोस वदि ४ सोमवारे श्रीपत्तनवास्तव्य लघुशाखायां श्रे. कोका भा. अकू सुत श्रे. थाऊआकेन भा.लाडकी-सुतहरजीयुतेन स्वश्रेयोर्थं श्रीविमलनाथबिंबं का. प्र. श्रीतपागच्छे श्रीहीरविजयसूरिभिः ।। श्रीरस्तु ।।

१२४८ ( ६४३ )

सं. १६३० वर्षे पोस व. ४ सोमे पत्तनवास्तव्य श्रीप्राग्वाटज्ञातीय से. सागण भार्या बाई जेठी सुत श्रे. नरसंग भार्या बाई सुराई श्रीश्रेयांसबिंबं कारापितं पुन्यार्थं श्रीतपा. श्रीहीरविजयसूरिभिः प्रति. ।।

१२४९ ( ६७४ )

सं. १६३० वर्षे पोष वदि ४ सोमे सांतलपुरवास्तव्य श्रीमालीज्ञातीयसंघेन कारितं श्रीवासुपूज्यबिंबं श्रीतपागच्छाधिराजश्रीहीरविजयसूरिभिः प्रति. श्रीश्रेयसेऽस्तु ।।

१२५० ( ११०५ )

सं. १६३० वर्षे पोस वदि ४ सोमे श्रीपत्तनवास्तव्य श्रीप्राग्वाटज्ञातीय सं. लडू भार्या बा. अच्छाबादे सु. से. विद्याधर भार्या बा. वांछी श्रीशातिनार्थबिंबं कारापितं श्रीतपागच्छे श्रीहीरविजयसूरिभिः प्रति. ।।

१२५१ ( १४५६ )

संवत् १६३० वर्षे पोस वदि चतुर्थ ४ दिने सोमवासरे डीसावालज्ञातीय सं. श्रीपाल भा. बाई रुपाई सु. सं. कडूआकेन सु. सं. जीवा प्रभृतिसमस्तकुटुंबसमन्वितेन श्रीशांतिनाथ-प्रतिमा का. प्रतिष्ठिता च तपागच्छनायकश्रीहीरविजयसूरिभिः

१२५२ ( १६५७ )

सं. १६३० वर्षे पोस वदि ४ दिने सोमवासरे प्राग्वाटज्ञातीय श्रे. उधव भा. बाइ संपू. पुत्र श्रे. गोपालेन का. निजश्रेयोर्थं श्रीपद्मप्रभनाथबिंबं प्रति. कारितं श्रीतपागच्छे प्रभावक भट्टारकश्रीहीरविजयसूरिभिः प्रति. श्रीरस्तु ।।

१२५३ ( १७२३ )

संवत् १६३० वर्षे माह सुदी १३ बुधे श्रीपत्तनवास्तव्य श्रीप्राग्वाटज्ञातीय वरदी-आ ... ... परमपट्ट (?) हरखाभार्याजी श्रीसिद्धचक्र श्रीआदि-नाथबिंबं च कारापितं श्रीतपागच्छ हीरसूरी प्रति. ।।

१२५४ ( ११९५ )

सं. १६३० वर्षे माघमासे शुकलपक्षे त्रयोदश्यां तिथौ बुधवासरे श्रीपत्तननगरवास्तव्य श्रीऊकेशज्ञातीयलघुशाखायां मं. सोमा भा. श्रीरति तत्पुत्र मं. तजा तजाभा. श्रीश्राविका-गुराई तत्पुत्र मंत्रहादा भा. श्रीनाकू तत्सुत मं. रुपा निजकुटुंबसहित स्वपुण्यार्थं मं हा-दाल्येन श्रीअंचलगच्छे श्री पं. धर्म्ममूर्त्तिसूरीश्वराणामुपदेशेन श्रीअजितनाथबिंबं कारापितं प्रतिष्ठितं श्रीसंघेन श्रीरस्तु ।। शुभं भवतु ।।

१२५५ ( ८२८ )

सं. १६३४ वर्षे माघ व. १ पत्तनवास्तव्य प्राग्वाटज्ञातीय बाइ वालो सुत कुंअरजी-केन कारितं श्रीसभवनाथबिंबं का प्र. तपागच्छे श्रीभट्टारकहीरविज सूरिभि ।।

१२५६ ( ८३८ )

सं. १६३८ वर्षे मा. व. १३ श्रीमहावीरका. श्री. नाथा मराघादिकारितं श्रीहीरविजयसू. प्रतिष्ठितं ।।

## १२५७ ( १०३२ )

सं. १६३४ वर्षे फा. सु. ८ वार शनौ प्राग्वाटज्ञा. सा. हन्यकरा (?) भार्या वइजलदे सुत रत्नपाल भार्या हीरादेश्रेयोर्थं तपागच्छे श्रीहीरविजयसूरि. प्रति. बिंबं श्रीकुंथुनाथस्य श्रीपत्तननगरे ॥

## १२५८ ( ११९६ )

सं. १६४२ वर्षे माघ व १० गुरौ श्रीविमलनाथबिंबं पाटणवास्तव्य ............ का. प्रति. ॥

## १२५९ ( ९२१ )

सं. १६४३ वर्षे फा. सु. ११ बृ. प्राग्वाटव्य. ............ श्रा. गंगाईनाम्न्या श्रेयोर्थं श्रीवासुपूज्यबिंबं का. प्र. तपागच्छे श्रीहीरविजयसूरीश्वरराज्ये भट्टारकश्रीविजयसेनसूरिभिः ॥ श्रीपत्तननगरे ॥ श्री ॥

## १२६० ( ४८९ )

सं. १६४३ वर्षे फागुण सु. ११ प्राग्वाटज्ञातीय लघुशाखायां दो. जोवा भा. बाइ हरखाई पुत्री बाई पुरी कर्मक्षयार्थे श्रीविमलनाथबिंबं का. प्र. श्रीहीरविजयसूरितत्पट्टे श्रीविजयसेनसूरिभिः ॥

## १२६१ ( १६०७ )

संवत् १६४३ वर्षे फागुण सुदि ११ श्रीमालीज्ञातौ श्रे. जीवा भा. जीवादेनाम्न्या पु. रायचंदयुतया श्रेयोर्थं श्रीधर्मनाथबिंबं का. प्र. तपागच्छे सुविहितशिरोमणिश्रीहीरविजयसूरिराज्ये श्रीविजयसेनसूरिभिः ॥ पत्तने ॥

## १२६२ ( १६२६ )

सं. १६४३ वर्षे फा.............. भग बिंबं गंगाइ............

## १२६३ ( ३२६ )

संवत् १६४७ वर्षे वैशाख सु. ३ शुक्रे ऊकेशवंशे गादहीयागोत्रे सा. समा भार्या सूहवदे पुत्र सा. छाजू भार्या रजाइ पुत्र सा. पासधीर सा. सहसवीर पुत्र ............ पुन्यार्थं श्रीआदिनाथबिंबं कारितं प्रति. श्रीबृहत्खरतरगच्छे श्रीजिनवर्धनसूरीणां पट्टे श्रीजिनचंद्रसूरिपट्टे श्रीजिनशीलसूरि-श्रीजीनकीर्तिसूरीणां पट्टे श्रीजीनसिंहसूरिभिः । श्रीरस्तु । पत्तनवास्तव्य ।

१२६४ ( ५४० )

सं. १६४६ वर्षे माह वदि २ बुधे पा. श्रीअकबरराज्ये पत्तनवास्तव्य श्रे. सं. करतो सं. पारदेनाम्ना स्वश्रेयसे श्रीकुंथुनाथ कारा. प्रति. श्रीतपागच्छे भट्टारकश्रीहीरविजयसूरिभिः इति ॥

१२६५ ( १५१० )

सं. १६४६ वर्षे माह वदि २ पत्तनवास्तव्य प्रा. पा. नाकर भा. नाथी सु. पा. वीरजीकेन समस्तकुटुंबयुतेन श्रीशांतिनाथबिंबं का. स्वश्रेयसि प्र. तपागच्छे श्रीहीरविजयसूरिभिः ॥ श्रीरस्तु ॥ पातसाह अकबरराज्ये ॥

१२६६ ( ७६१ )

सं. १६४६ वर्षे माह वदि २ बुधे अद्येह श्रीपत्तनमध्ये वास्तव्य प्राग्वाटज्ञातीय लघुशाखायां दोशी कीका भार्या बाई मंगाई सुत दोसी जना बिंबं श्रीधर्मनाथ[स्य] कर्मक्षयार्थं कारितं श्रीहीरविजयसूरि तपागच्छे ॥

१२६७ ( १२०० )

सं. १६४६ वर्षे मा. व. २ दिने श्रीमालज्ञातीय श्रा. गंगाइनाम्न्या श्रीमुनिसुव्रतबिंबं का. प्रति. त. श्रीहीरविजयसूरिभिः श्रीरस्तु ॥

१२६८ ( ६७० )

सं. १६४६ वर्षे माह वदि २ बुधे उसवालज्ञातीय श्रीअकबराज्ये विमानाम्ना स्वश्रेयोर्थं श्री प ........................ ................ कारितं प्रतिष्ठितं तपागच्छे श्रीहीरविजयसूरिभिः ॥

१२६९ ( ७५६ )

सं. १६४६ व. मा. व. २ ऊकेशज्ञातीय श्रा. वच्छाई नाम्न्या स्वश्रेयोर्थं श्रीकुंथुनाथबिंबं का. प्र. तपागच्छे जगद्गुरु श्रीहीरविजयसूरिभिः ॥

१२७० ( ७४४ )

सं. १६४६ वर्षे माह वदि २ पातसाहश्रीअकबराज्ये उकेशज्ञातीय विसा पुजानाम्ना स्वश्रेयोर्थं श्रीपद्मप्रभबिंबं का. विधिना प्र. श्रीतपागच्छे भट्टारकश्रीहीरविजयसूरिभिः श्रीपत्तनगरे ॥

१२७१ ( २६२ )

संवत् १६४६ वर्षे माघ वदि २ दिने श्रीश्रीमालज्ञातीय सेठि अभराज सुत धनराज भार्या नाकू श्रीमुनिसुव्रतबिंबं कारापितं तपागच्छे श्रीहीरविजयसूरि प्रतिष्ठितं ।।

१२७२ ( २४२ )

संवत् १६४६ वर्षे माघ वदि २ दिने पत्तनवास्तव्य उ. सा. तेजपाल पु. श्रा. सोनाकेन वासुपूज्यबिंबं प्र. तपाश्रीहीरविजयसूरि ।।

१२७३ ( २४० )

संवत् १६४६ वर्षे माघ वदि २ दिने पत्तनवास्तव्य प्राग्वाटज्ञातीय श्रीकुयरीश्रेयोर्थं श्रीश्रीमुनिसुव्रतस्वामिबिंबं प्र. श्रीतपागच्छे श्रीहीरविजयसूरिभिः श्रेयोस्तु श्रीअकब्बरराज्ये ।।

१२७४ ( १५६७ )

सं. १६५२ वर्षे माह सु. १० दिने कुकडचोपडागोत्रे प. विजय तत्पुत्र. देवजीसिंघ भार्या विमलादे तत्पुत्र ........................ बकां तत्पुत्र प. मेहा-जेठा-रार्यसिंघसपरिवारयुतेन श्रीचंद्रप्रभबिंबं का. प्र. श्रीखरतरगच्छे युगप्रधानश्रीजिनचंद्रसूरिभिः ।।

१२७५ ( ८७७ )

सं. १६५४ वर्षे माघ वदि १ रवौ श्रीमालज्ञातीय वुहरा वरधा भार्या वहलादे सुत वु. वस्ताकेन श्रीविमलनाथबिंबं कारापितं श्रीपूर्णिमापक्षे प्रधानशाखायां श्रीविद्याप्रभसूरिपट्टे श्रा. ललितप्रभसूरिभिः प्रतिष्ठितं पुत्रादिसुखं भूयात् ।।

१२७६ ( १४५४ )

सं. १६५४ वर्षे माघ वदि १ रवौ दोसी गपूआकेन श्रीपद्मप्रभबिंबं का. श्रीपूर्णिमापक्षे श्रीललितप्रभसूरिभिः प्रति. ।।

१२७७ ( १३१३ )

सं. १६५४ वर्षे माघ व. १२ श्रीमालज्ञातीय दोसी वरुमान भा. वहलादे सु. दोसी लालजीकेन श्रीशीतलनाथबिंबं कारापित श्रीपूर्णिपक्षे प्रधानशाखायां श्रीविद्याप्रभसूरिपट्टे श्रीललितप्रभसूरिभिः प्रति. श्रीसुखं भूयात् ।।

१२७८ ( १२७८ )

सं. १६५४ माघ वदि ........................................................................
श्रीधर्मनाथबिंबं ........................................................................

१२७९ ( १४५५ )

सं. १६५४ दो. मकेन श्रीवासुपूज्यबिंबं का.

१२८० ( १२१५ )

सं. १६६० वर्षे वै. सु. ६ बुधे श्रीपत्तनवास्तव्येन काह्नजी भा. कुग्ररि तत्पुत्रीतेजुनाम्न्या श्रीसुमतिनाथबिंबं का. प्र. श्रीतपागच्छे श्रीहीरविजयसूरिपट्टालंकारभट्टारकश्रीविजयसेनसूरिभिः ॥

१२८१ ( १४८० )

सं. १६६२ वर्षे ........................................................................

श्रीसुमतिनाथबिंबं का. प्र. ॥

१२८२ ( ७२६ )

सं. १६६२ वर्षे शाके १५२७ प्रवर्त्तमाने फाल्गुनिमासे कृष्णपक्षे द्वितीया शुक्रे सा. श्रीकडूग्रा निसमबाइ (?) सुश्रावक श्रीमालीज्ञातीय वृद्धशाखायां प. देवदास भार्या रत्नू सुत पांगा भा. वीरादे सुत लटकणकेन भार्यालखमादे-पुत्रवीरदासजिणदाससहितेन श्रीशांतिनाथबिंबं कारितं थरादरा पत्तनवास्तव्य ॥

१२८३ ( ६६४ )

सं. १६६२ वर्षे फागुण वदि २ शुक्रे प. लटकणगृहे भार्या लखमादे सुत वीरदासेन श्रीग्रजितनाथबिंबं कारितं ॥

१२८४ ( ६६३ )

सं. १६६२ वर्षे शाके १५२७ प्रव. फागुण वदि २ शुक्रे. प. लटकण भार्या लखमादेकेन श्रीविमलनाथबिंबं ॥

१२८५ ( १६२३ )

सं. १६६२ वर्षे साके १५२७ प्रवर्त्तमाने फाल्गुनी वदी द्वितीयाशुक्रवारे श्री. कडुग्रा निशमबाइ पत्तनवास्तव्य महालीरा (?) ज्ञातीय लघुशाखायां मनिहीना (?) वीणा भारिशीहा (?) सुत माणचंद भा. प्रेमलदे सुत मं. लिलाजीकेन भा. गंगाइसहितेन श्रीकुंथुनाथबिंबं कारितं श्रावकेण प्रतिष्ठितं शुभं भवतु ॥

१२८६ ( ४० )

संवत् १६६४ वर्षे पोस वदि सप्तमी बुधे श्रीपत्तननगरवास्तव्य बाई अणु अरिनाम्न्या श्रीवासुपूज्यबिंबं का. प्र. च तपागच्छेभ.विजयसेनसूरिशिष्यभट्टारकविजयदेवसूरिभिरिति भद्रम् ॥

१२८७ ( ६५७ )

सं. १६६४ पोष वदि ७ बुधे श्रीमालीज्ञातीय सा. साईआ भार्या सेपूनाम्न्या श्रीकुंथुनाथबिंबं का. प्र. च. श्रीतपागच्छे भ. श्रीविजयसेनसूरिशि. भ. श्रीविजयदेवसूरिभिः ॥

१२८८ ( ६६७ )

सं. १६६४ पोस वदि ७ बुधे
मुनिसुव्रतबिंबं का. प्र.
श्रीविजयदेवसूरिभिः ॥

१२८९ ( ८३५ )

सं. १६६४ पोष वदि ७ बुध गंगाईनाम्न्या श्रीवासुपूज्यबिंबं का. प्र. तपा. श्रीविजय
... .... .... प्र. ॥

१२९० ( ८९९ )

सं. १६६४ वर्षे वदि ७ श्रीनेमबिंबं का.
विजयदेवसूरि
प्रतिष्ठितं ॥

१२९१ ( १७०३ )

सं. १६६७ वर्षे माघ सु. पंचम्यां युगप्रधानश्रीजिनचंद्रसूरिविजयराज्ये वाचनाचार्यश्रीकुमारसुंदरगणिनां पादुका कारिता सं. अमरदत्त पुत्र सं. कुवर प्रतिष्ठितं युगप्रधानगुरुभिः तदंतेवासिना लक्ष्मीप्रमोदगणिनामुपदेशेन श्री

१२९२ ( ९२ )

सवत् १६६७ वर्षे वशाख सुदी १५ सोमे श्रीमूलसघ सरस्वतीगच्छे बलात्कारगण भ. श्रीसकलकीर्तिसू. भ. श्रीभुवनकीर्तिसू. श्रीकुंदकुंदावान्वये भ. श्रीज्ञानभूषणसू. भ. श्रीविजयकीर्तिगुरूपदेशात् नि. श्र. रामा भा. भली द्वितीया कुंती सुत सहितसा भार्या हीरा सु. तेजा भार्या मांजा भा. षोषा वरुया एते प्रणमति ॥

१२६३ ( १७३० )

सं. १६६६ वर्षे काती सुदि २ गुरौ कलापूर्ण यतीजीना पगला आचार्य सुमतिचंद्रसूरि श्रीसुमतिसूरिजी ........................ .......................... ... .. .... शुभंभवतु

१२६४ ( १३ )

संवत् १६७० वरखे महा सुद १२ दोसी लालजी अदमा श्रीसातनाथबिबं...

१२६५ ( ६६ )

संवत् १६७२ वर्षे माघ सु. १३ रवौ राजधनपुरवास्तव्य वृ.श्रीमालीज्ञातीय म. खीजसी भार्या. षेतलदे पुत्र सं. दानानाम्ना भार्या हर्षादे पुत्र कुटुंबयुतेन स्वश्रेयसे श्रीधर्मनाथबिबं का. प्र. श्रीतपागच्छे भ. श्रीविजयदानसूरिपट्टप्रभावक भ. श्रीविजयदेवसूरिभिः ॥ श्रीरस्तु ॥

१२६६ ( ६३३ )

सं. १६७२ ज्येष्ठ सुदि ५ शुक्रे पत्तनवास्तव्य प्राग्वाटज्ञातीय वृद्धशाषीय प. शवा भार्या बाई पूराईनाम्न्या स्वश्रेयसे श्रीसंभवनाथबिबं का. प्र. च तपागच्छे पातशाही श्री अकबरप्रतिबोधकभट्टारकश्रीविजयसेनसूरीश्वरपट्टोदयाचलदिनकरकरणिसुविहितसूरीश्वरचूडामणीयमानभट्टारकविजयदेवसूरिभिः ॥

१२६७ ( १४०५ )

सं. १६७२ नाश्री........................ ...................... ........................... ............

पार्श्वनाथबिबं..............................................

१२६८ ( १४६० )

संवत् १६७३ वर्षे पोष कृष्ण पंचमी शुक्रवार श्रीपत्तननगरवास्तव्येन वृद्धशाखायां श्रीमालीज्ञातीय दोसी धनजी भार्या मर्घाइ सुत दोसी संतोषोकेन भार्या सहजणदे प्रमुखकुटुंबयुतेन स्वश्रेयसे श्रीवृषभदेव परिकरकारितः प्रतिष्ठितस्य तपागच्छे भट्टारकपुरंदरभट्टारकश्रीविजयसेनसूरीश्वरपट्टालंकारहारानुकारिभट्टारकप्रभुभट्टारकश्रीविजयदेवसूरिभिरिति भद्रम् ।

१२६९ ( १२१६ )

सं. १६७३ वर्षे पोस व. द्वितीय ५ शुक्रे प्राग्वाटज्ञा. दो. जसवनाम्ना श्रीनमिनाथबिबं का. प्रति. च तपा. श्रीविजयदेवसूरिभिः ॥

१३०० ( १७०८ )

सं. १६७३ वर्षे वृध्धखरतरगच्छाधीश्वरश्रीजिनचंद्रसूरि ..............................

१३०१ ( १४०२ )

सं. १६७३ श्रीशांतिनाथबिंबं का. प्र. श्रीविजयदेवसूरिभिः ॥

१३०२ ( १४०१ )

सं. १६७३ श्रीशांतिबिंबं का. प्र. तपा. श्रीविजयदेवसूरिभिः ॥

१३०३ ( ३८९ )

संवत् १६७७ वर्षे मा. सु. ५ रवौ पत्तनवा. श्रीमालीज्ञा. सा. लखमणकेन श्रीशांतिनाथबिंबं का. प्र. च. तपागच्छे श्रीविजयसेनसूरिपट्टालंकार भ.श्रीसूरिभिः ॥

१३०४ ( १०९८ )

सं. १६७७ वर्षे मार्गशीर्ष शुक्ल ५ रवौ प्राग्वाटज्ञा. पत्तनवास्तव्य वि. सिंघ भा. अजाई पु. वि. टोकर भा. रहिया पु. माहवजीकेन श्रीअनंतनाथबिंबं का. प्र. श्रीविजयदेवसूरिभिः ॥ श्री ॥

१३०५ ( १०९४ )

सं. १६७७ वर्षे मार्गशीर्ष ५ रवौ पत्तनवास्तव्य प्राग्वाटज्ञातीय वि. महावजी भार्या कनका पुत्र वि. विमलदासकेन श्रीसुमतिनाथबिंबं का. प्र. च श्रीविजयदेवसूरिभिस्तपागच्छे ॥

१३०६ ( ८८८ )

सं. १६७८ वर्षे ज्येष्ठ सु. १० शुक्रे श्रीपत्तननगरवास्तव्य बृहत् शाखायां उकेशज्ञातीय त. कमधित (?) भ. हीर ............................................................ श्रीसंभवनाथबिंबं का. प्र. भ. तपागच्छे भट्टारकश्रीविजयदेवसूरी पं देवाय...

१३०७ ( ३४८ )

संवत् १६८१ वर्षे ज्येष्ठ सुद १३ वार बुधे पाटणवास्तव्य श्रीश्रीमालज्ञातीय श्रीवृध्धशाखीय श्रेष्ठी श्रीराज भार्या बाइ रंगाइ सुत श्रेष्ठी पदमशी सुत मालजी श्रीतपागच्छे श्रीविजयसेनसूरि तत्पट्टे भट्टारकविजयदेवसूरि श्रे. पदमसीनामाकृतबिंबं श्रीशीतलनाथस्य श्रीइडरनगरे प्रतिष्ठितं ॥

१३०८ ( ३४७ )

संवत् १६८१ वर्षे ज्येष्ठ सुदि १३ वार बुधे श्रीपाटणवास्तव्य श्रीश्रीमालीज्ञातीय वृध्धशाखीय परी. नाकर योबदेवी (?) रहि सुत परी. काहानजी भार्या बाइ मांजू सुत सोमा कीका श्रीतपागच्छे श्रीविजयसेनसूरि भट्टा. श्रीविजयदेवसूरि परी. काहानजी नामकृतबिंबं श्रीशांतिनाथस्य इडरनगरे प्रतिष्ठितं ॥

१३०९ ( ५१५ )

स्वस्तिश्री सं. १६८२ वर्षे वै. सित ८ तिथौ वार गुरौ पत्तनवास्तव्य श्री प्रा. ज्ञा. वृध्धशाखाया दु. जोगी भा. पाजू समदे सुता देवकी तपागच्छे भ. श्रीविजयदेवसूरिसहितैः श्रीशंभवनाथबिंबं प्रति. ॥ श्री ॥

१३१० ( ११६७ )

सं. १६८३ वर्षे वै. सु. ...................... तिथौ वार ...................... पत्तनवास्तव्य प्राग्वाटज्ञा. देवजीकेन स्वश्रेयसे श्रीसंभवनाथबिंबं का. प्र. च तपागच्छे ...................... श्रीविजयदेवसूरिभिः आचार्य श्रीविजयसिंहसूरिसहितेन ॥

१३११ ( ११८७ )

सं. १६८३ वर्षे ज्येष्ठ सुद ३ थरादरा वु. भीमा पुत्री बाइ मटकाकेन श्रीसुमतिबिंबं सा. तेजपालेन प्रति. ॥

१३१२ ( ७६८ )

सं. १६८३ आषाड वदि ४ गुरौ मं. जेसा सुत मं. जयमल्लनाम्ना स्वश्रेयसे श्रीधर्म-नाथबिंबं का. स्व ...................................................... प्रति. तपा. भ. श्री-विजयसेनसूरिपट्टप्रभाकर भट्टारकश्रीविजयदेवसूरिभिः ॥

१३१३ ( ६१० )

सं. १६८४ वर्षे वै. व. २ श्रीपार्श्वनाथबिंबं का. प्र. ...................... ...................... नाथ ......................................

१३१४ ( १५६२ )

सं. १६८५ वर्षे फागुण वदि ३ श्रीमालज्ञातीय झाझण वालदलिह वंजण (?) ...... ...................................... श्रीआदिनाथ कतुलक्षीया (?) श्री ध ...................... श्रीदेव-सूरिपट्टे श्रीधर्मचंद्रसूरि प्रति. ॥

१३१५ ( ६८ )

संवत् १६८६ वर्षे ज्येष्ठ वदि...... ..................दिने पत्तनवास्तव्य प्राग्वाटज्ञातीय लघुशाखीय वि. नाना भा. कुअरि तयो मुनिसुव्रतबिंबं कारितं प्रतिष्ठितं तपागच्छाधिपश्री-विजयदेवसूरिभिः ।।

१३१६ ( १६८५ )

संवत् १६८९ वर्षे भादरवा सुदि ६ दिने श्रीबृहत्खरतरगच्छे भट्टा. ............ ............... युगप्रधान ..................... ......................श्रीजिनचंद्रसूरिपादुका श्रीजिनवर्धनसूरिप्रतिष्ठितं शुभंभूयात् ।।

१३१७ ( ६७४ )

सं. १६९२ वर्षे वै. सु. ८..................................................................

१३१८ ( २३० )

संवत् १६९३ वर्षे वइसाग सुदि ६ गुरौ श्रीपत्तननगरे [अदु] व्यसोपाटके ओसवालज्ञातीय लघुसाखायां व्य. सारंग भार्या षारिमी पुत्री बाइ अपु श्रीधर्मनाथबिंबं श्री-तपागच्छे श्रीविजयदेवसूरिराज्ये आचार्य श्रीविजयसंघसूरि प्रतिष्ठितं ।।

१३१९ ( ३६३ )

संवत् १६९३ वर्षे वै. सु. ६ गु. भाणपुरवास्तव्य प्राग्वाटज्ञातीय श्रीमहावीरस्वामि-बिंबं का. प्रति. श्रीविजयदेवसूरिपट्टे आचार्यश्रीपं.विजयसिंहसूरिभिः ।।

१३२० ( ११२९ )

सं. १६९३ वर्षे वै. सु. ६ गुरुपुष्ये पत्तनवास्तव्य सा. मानसिंह भा. माणिकिदेनाम्न्या श्रीसुमतिनाथबिंबं का. प्र. तपागच्छे भट्टा. श्रीविजयदेवसूरिपट्ट आचार्यश्रीपं. श्रीविजय-सिंहसूरिभिः ।।

१३२१ ( १६५३ )

सं. १६९३ वै. सु. ६ ................ ....वास्तव्य श्रीपत्तननगरे प्राग्वाटज्ञा. परी. सूरा सु. परी. रणसंगकेन श्रीसुवधिनाथस्य बिंबं कारापितं श्रीतपागच्छाधिराजश्रीश्री-विजयदेवसूरिश्वरराज्ये प्रति. श्री पं. विजयसिंहसूरिभिः ।।

१३२२ ( ७२१ )

सं. १६६३ वर्षे वै. सुदि ६ श्रीपत्तननगरे श्रीमालीज्ञातीय वृद्धशाखायां श्रे. रायचंद भार्या बा. श्रीबाईनाम्न्या श्रेयांसस्य बिंबं श्रीतपागच्छे श्रीविजयदेवसूरीश्वरराज्ये प्रतिष्ठितं श्रीविजयसिंहसूरिभिः ।। श्री ।। श्री ।।

१३२३ ( ५३३ )

सं. १६६३ वर्षे वै. सु. ६ श्री अजितनाथबिंबं ............ ............
पाटयो ............

१३२४ ( ३८७ )

संवत् १६६३ वर्षे वै. सु. ६ गुरौ ............ वास्तव्य श्रीपत्तननगरे प्राग्वाटज्ञातीय लघुशाखीय सरी हीरजी सुत धर्मदासकेन श्रीअजितनाथस्य बिंबं श्रीतपागच्छे श्रीविजयदे [व] सूरिराज्ये प्रतिष्ठितं श्रीविजयसिंहसूरिभिः ।।

१३२५ ( १५७० )

सं. १६६३ वर्षे वैशाख सुदि ...... श्रीपत्तननगरे परी. देउ भा. बाइ ...... ......
............ श्रीसंभवनाथबिंबं का. प्र. ।।

१३२६ ( ११५१ )

सं. १६६४ वर्षे फा. सु. ५ ऊकेश. वृ. सो. लहुआ भा. बा. चऊथीनाम्न्या श्रीआदिबिंबं का. प्र. तपागच्छे श्रीविजयदेवसूरिपट्टे श्रीविजयसिंहसूरिभिः ।।

१३२७ ( ५८३ )

सं. १६६७ वर्षे फा. सु. ५ गुरौ श्रीअणहिलपुरवास्तव्य प्राग्वाटवृद्ध. प. वर्धमान सुत सा. कल्याणनाम्ना स्वपुत्र सा. आसराजसहितेन स्वश्रेयोर्थं श्रीवर्धमानबिंबं का. प्र.
श्रीविजयसेनसूरीश्वर पट्टे ............ ............ ............
श्रीविजयदेवसूरिभिः श्रीविद्यापुर श्रीदक्षिणस्या ............

१३२८ ( ५९१ )

सं. १६६७ फा. सु. ५ वृद्धप्राग्. ज्ञा. कल्याणसुत व्य. आमानाम्ना श्रीपार्श्वबिंबं
का. प्र. तपागच्छे ............

१३२९ ( १६३७ )

सं. १६६७ वर्षे फा. सु. ७ सूरजमल कल्याणेन श्रीशांतिनाथबिंबं का. प्र. श्रीविजयसिंहसूरिभिः ।।

१३३० ( ५९९ )

सं. १६९७ वर्षे फागुण सुदि ८ गुरौ व्य. हीरानाम्न्या श्रीशांतिनाथबिंबं कारितं प्रतिष्ठितं तपा. भ. विजयदेवसूरिभिः ।।

१३३१ ( १०९९ )

सं. १६ ... वर्षे ........................................................................................................
पादेवरभसू. (?) ..............................................................

१३३२ ( ११४६ )

सं. १६–४ श्रीपत्तननगरवास्तव्य प्राग्वाटज्ञा. तैनावगोत्रि श्रे. शंकर भार्या बाइ पल्हाइ पुत्र श्रेष्ठि श्रीपदमसी भा. बाइ कमलादे पुत्री बाइ वाल्ही निजपुण्यार्थं श्रीसंभवनाथबिंबं कारापितं प्रति. तपागच्छेशश्रीहीरविजयसूरिभिः ।।

१३३३ ( ८८४ )

संवत् १६–२ वरखे फा. सु. १२ श्रीपार्श्वस्य बिंबं कर्म्मक्षयार्थं साह हेमाराई संघेन कारितं ।।

१३३४ ( ९०९ )

सं. १७०२ वर्षे बाईपुरीकारितः श्रीसिद्धचक्रपट्टकः प्रति. पं. श्रीकमलविजयगणिभिः ।।

१३३५ ( २३१ )

संवत् १७०५ वर्षे मार्गशिर्ष कृष्ण ............................................ पत्तननगरवास्तव्य नाइ तेजूनाम्न्या कारितं श्री ............................................................ बिंबं प्रतिष्ठितं तपागच्छे भ. श्रीविजय ......... ................................ सूरि पट्ट [प्रभा] कर आचार्य श्रीविजयसिंहसूरिभिः ।।

१३३६ ( १६०८ )

सं. १७०५ वर्षे वै. व. २ दिने पत्तनवास्तव्य प्राग्वाटज्ञा. लघुशा. भ. कुवरजी सुत कीका भार्या श्रीवतीनाम्न्या श्रीकुंथुनाथबिंबं का. प्र. तपा. श्रीविजयदेवसूरिभिः श्रीविजयसिंहसूरि ...................................................................

१३३७ ( १५३३ )

सं. १७०५ वर्षे वै. व. ..................... दिने पाटणवास्तव्य देवकरण पु. संमरदक (?) श्री .................. नाथबिंबं का. प्र. श्रीविजयदेवसूरिभिः ।।

१३३८ ( १७३२ )

संवत् १७१३ वर्षे माघ शुक्ल ७ दिने श्रीतपागच्छ ............ भट्टारक श्रीविजयसेनसूरीश्वररजी ............ कारि भट्टारकविजयदेवसूरीश्वराणां पादुका ............ संघ ............ विजयप्रभसूरीपुरंदरकारिता ...

१३३९ ( १३४९ )

सं. १७२७ ना कार्तिक सु. ५ बुधे शा. मीठाचंद लाधाचंद ॥

१३४० ( १४७० )

